गसंहिताम्” स च धर्म्ममीमांसां प्रणीतवान्। तच्च शास्त्रं द्वादशाध्यायात्मकम्। तत्प्रतिपाद्यविषयास्त्वाधिकरणमालायां माधवाचार्य्येण संगृहीता यथा

“धर्म्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः। प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः। अधिकारोऽतिदेशश्च सामान्येन विशेषतः। ऊहोऽबाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्”। “लक्षणान्यध्यायाः। द्वादशानां लक्षणानां समाहारो द्वादशलक्षणी। तादृशस्य द्वादशाध्यायोपेतस्य शास्त्रस्य धर्म्मो विषयः। प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमाद्द्वादशानामध्यायानां विषयाः। तत्र प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम्। द्वितीये यागदानादिकर्म्मभेदः। तृतीये प्रयाजादीनां दर्शपूर्णमासाद्यर्थत्वेन तच्छेषत्वम्। चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्त्यानुष्ठानम् न तु क्रत्वर्थत्वप्रयुक्त्येत्येवमादयः। पञ्चमे क्रमनियतिविधेयत्वादयः। षष्ठे कर्त्तुरधिकारो नान्धादेरित्यादयः। सप्तमे समानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनेनाग्निहोत्रादिनाम्नानुमितवचनेन च सामान्यतोऽतिदेशः। अष्टमे सौर्य्यं चरुं निर्वपेदित्यत्र निर्वापस्तद्धितेन देवतानिर्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादिलिङ्गेनाग्नेयपुरोडाशेतिकर्त्तव्यतैव नान्यस्येत्येवमादिर्विशेषतोऽतिदेशः। नवमे प्रकृतावग्नये जुष्टं निर्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण च सूर्याय त्वा जुष्टं निर्वपामीत्येवमाद्यूहः। दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणाभावेन लोप इत्येवमादिर्बाधः। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम्। द्वादशे प्रधानस्य पशोरुपकारायानुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः। पादानामसाधारणं विषयं दर्शयति” “विध्यर्थवादमन्त्रस्मृतयोनाम चेति चतुर्विधम्। प्रथमाध्यायगैः पादैश्चतुर्भिर्मानमीरितम्” “प्रथमे पादे विधिरूपं मानमीरितम्। द्वितीयेऽर्थवादरूपम्। अर्थवादो मन्त्रस्याप्युपलक्षणम्। तृतीये स्मृतिरूपम्। स्मृतिराचारमप्युपलक्षयति। चतुर्थे उद्भिच्चित्रादिनामरूपम्” “उपोद्घातः कर्म्मभेदमानं तस्यापवादगीः। प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः”।

द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्वबोधकमपूर्वसद्भाव इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः। द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः। तृतीये रथन्तरादीनां कर्म्मभेदप्रमाणस्यापवादः। चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः”। “श्रुतिर्लिङ्गं च वाक्यादि विरोधप्रतिपत्तयः। अनारभ्योक्तिबह्वर्थस्त्वान्यथाष्टपादगाः”। “तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्यप्रकरणादि। चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसदसद्भावः। पञ्चमे प्रतिपत्तिकर्म्माणि। षष्ठेऽनारभ्याधीतानि। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि। अष्टमे याजमानानि”। “प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता। फलचिन्ता जघन्याङ्गचिन्तेत्येते चतुर्थगाः”। चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षा दध्यानयनस्य प्रयोजिकेत्यादिप्रधानप्रयोक्तृत्वं विचारितम्। द्वितीये त्वप्रधानं वत्सापाकरणं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम्। तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता। चतुर्थे राजसूयगतजघन्याङ्गाक्षद्यूतादिचिन्ता”। “श्रुत्यादिभिः क्रमस्तस्य विशेषो वृद्ध्यवर्धने। श्रुत्यादेर्बलता चेति पञ्चमाध्यायपादगाः”। “पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः। द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादि क्रमविशेषः। तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकैकश्यमित्यादिवृद्धिः। अदाभ्यग्रहचितिन्योरनावृत्तिरित्यादिवृद्ध्यभावः। चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः। “अधिकारी तस्य धर्म्माः प्रतिनिध्यर्थलोपने। दीक्षा सत्रं देयवह्नी षष्ठे पादेष्वमीस्थिताः”। षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकारः कर्त्तुरस्त्यन्धादेर्नास्ति स्त्रिया अस्ति योऽस्ति स च पत्या सहेत्येवमादिनाधिकारी निरूपितः। द्वितीये सत्त्राधिकारिणां प्रत्येकं कृत्स्नं फलम्। दर्शपूर्णमासयोः कर्त्रैक्यनियमः। काम्यकर्म्म समापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ताः। तृतीये द्रव्यस्य प्रतिनिधिरस्ति। देवादीनामग्न्यादीनामधिकारिणश्च स नास्तीत्यादिना निरूपणम्। चतुर्थे पदार्थलोपनं विचारितम्। अवत्तनाशे सत्याज्येन यजेत। इडाद्यर्थनाशे सति शेषान्नं ग्राह्यमित्यादिकम्। पञ्चमे कालापराधेन चन्द्रोदये तत्प्रभृत्युदयेष्टिः प्रायश्चित्तम्।